Jain Education International For Private & Personal Use Only www.jainelibrary.org

मूलउ मूलकम् ।
रोहीस रोहिषः ।
डाभ दर्भः ।
धोव दूर्वा ।
मोथ मुस्ता ।
त्रिणउ तृणम् ।
खड खटः ।
विस विषः ।
वच्छनाग वत्सनागः ।
कीडउ कीटः ।
जलो जलौकाः ।
कवडउ कपर्दः ।
कउडी कपर्दिका ।
वांभणी ब्राह्मणी ।
घीवेलि घृतेली ।
उदेही उपदेहिका ।
लीख लिक्षा ।
जू यूका ।
छप्पई षट्पदी ।
माकण मत्कुणः ।
वीछू वृश्चिकः ।
भमरउ भ्रमरः ।
खजूअउ खद्योतः ।
मयण मदनम् ।
माखी मक्षिका ।
तिर्यंच तिर्यङ् ।
हाथी हस्ती ।
सूंड शुण्डा ।
आंकुस अङ्कुशः ।
घोडउ घोटकः ।
पूछ पुच्छम् ।
दामण दामाञ्चनम् ।
पाखर प्रक्षरः ।
वाग वल्गा ।
पलाण पल्ययनम्, पर्याणं वा ।
ऊंट उष्ट्रः ।
करहउ करभः ।
गदहउ गर्दभः ।
बलद बलीवर्दः ।
सांड षण्डः, षण्ढः ।
धोरी धौरेयः ।
पोठीयउ पृष्ठ्यः ।
सींग शृङ्गम् ।
वांझ गाइ वन्ध्या गौः ।
ऊहाडउ ऊधः ।
छाणउ छगणम् ।
गोउल गोकुलम् ।
खीलउ कीलकः ।
छालउ छगलः ।
बकरउ बर्करः ।
मींढउ मेण्टकः ।
कूकर कुक्कुरः ।
सीह सिंहः ।
वाघ व्याघ्रः ।
सादूल शार्दूलः ।
चीत्रउ चित्रकः ।
गइंडउ गण्डकः ।
सूअर सूकरः ।
रीछ ऋच्छः, ऋक्षो वा ।
स्याल शृगालः ।
लउंकडी लोमटिका ।
सिसलउ शशः ।
गोह गोधा ।
गोहीरउ गोधेरः ।
मूसउ मूषकः ।
ऊंदिरउ उन्दुरः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जाहउ जाहकः ।
नउल नकुलः ।
विसहर विषधरः ।
सउण शकुनः ।
पंखी पक्षी ।
चांच चञ्चुः ।
पींछ पिच्छम् ।
पांख पक्षः ।
मोर मयूरः, मोरो वा ।
चांदलउ चन्द्रकः ।
कोइल कोकिलः ।
कोइली कोकिला ।
घूघू घूकः ।
कूकडउ कुक्कुटः ।
चास चाषः ।
बावीहउ बप्पीहः ।
टींटोहडी टिट्टिभः ।
चिडउ चटकः ।
चिडी चटका ।
बगलउ बकः ।
चील्ह चिल्लः ।
सूडउ शुकः ।
सारी शारिका ।
चामाचेड चर्मचटका ।
वागुलि वल्गुलिका ।
आडि आटिः ।
पारेवउ पारापतः ।
तीतिर तित्तिरिः ।
माछलउ मत्स्यः ।
तन्तुअउ तन्तुः ।
काछबउ कच्छपः ।
दादुर दर्दुरः ।
जनम जन्म ।
सास श्वासः ।
आउषउ आयुः ।
कुंअलउ कोमलः ।
सूआलउ सुकुमालः ।
नीठुर निष्ठुरः ।
महुरउ मधुरः ।
मीठउ मृष्टम् (मिष्टम्) ।
पांडरउ पाण्डुरः ।
कविलउ कपिलः ।
सामलउ श्यामलः ।
काबरउ कर्बुरम् ।
पांति पङ्क्तिः ।
थोडउ स्तोकम् ।
ऊजलउ उज्ज्वलम् ।
चोखउ चोक्षम् ।
नयडउ निकटम् ।
सासतउ शाश्वतम् ।
माझ मध्यम् ।
विचालउ विचालम् ।
सारीखउ सदृक्षम् ।
झांप झम्पा ।
भरिअउ भरितम् (भृतम्) ।
वींट्यउ वेष्टितम् ।
दाधउ दग्धम् ।
वींध्यउ विद्धम् ।
फाडियउ पाटितम् ।
छेदियउ छेदितम् ।
लाधउ लब्धम् ।
पठावियउ प्रस्थापितम् ।
कामण कार्मणम् ।
सांकडउ संकटम् ।
उच्छव उत्सवः ।
मेलउ मेलकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विघन विघ्नः ।
परिचउ परिचयः ।
काज कार्यम् ।
ऊपरि उपरि ।
आगइ अग्रतः ।
सांप्रत सांप्रतम् ।
अरिहंतभणी नमो अर्हते नमः ।
सद्दहियउ श्रद्धितम् ।
वांकउ वक्रम् ।
कूंपल कुड्मलम् ।
मणसिल मनःशिला ।
सुमिणउ स्वप्नः ।
पीहर पितृगृहम् ।
आलउ आर्द्रम् ।
सिढिल शिथिलम् ।
करीस करीषः ।
गुहिरउ गम्भीरम् ।
विहूणउ विहीनः ।
पीठ पीठम् ।
मउर मुकुरम् ।
गरुयउ गुरुकम् ।
भिंगार भृङ्गारः ।
वींट वृन्तम् ।
सिंगार शृङ्गारः ।
रिणउ ऋणम् ।
गारवउ गौरवम् ।
गउरवान गौरं गौरवर्णं च ।
सांकलउ शृङ्खलम् ।
छांह छाया ।
नीमी नीवी ।
झीणउ क्षीणम् ।
खोडउ क्त्रो(क्षौ?) टकः ।
जट्ट जर्त्तः ।
भसम भस्म ।
दाहिणउ दक्षिणः ।
कोहली कूष्माण्डी ।
सलाह श्लाघा ।
हलुअउ लघुकः ।
सीप शुक्तिः ।
मइलउ मलिनम् ।
छोति छुप्तिः ।
अछूतउ अस्पृश्यः ।
हेठइ अधः ।
तुम्ह केरउ युष्मदीयः ।
अम्ह केरउ अस्मदीयः ।
एकलउ एकः (एककः) ।
नवलउ नवः ।
पीलउ पीतम् ।
काठउ गाढम् ।
जेवडउ यावान् ।
तेवडउ तावान् ।
वीच वर्त्म ।
वहिलउ शीघ्रम् ।
झगडउ झगटकः ।
कोड कौतुकम् ।
जुआ जुआ पृथक् पृथक् ।
समधात समधातुः ।
गीत धातइ गायउ गीतं धातुना गीतम् ।
आगइ वाघ अग्रे व्याघ्रः ।
पाछइ दोतडि पश्चाद्दुस्तटी ।
वरतरकाटिवउ वस्त्राकर्त्तनम् ।
सड्यउ शटितम् ।
मांडी मण्डिका ।
लापसी लपनश्रीः ।
गुलमंडा गुडमण्डका ।
वीनती विज्ञप्तिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कच्चोलउ कचोलकः ।
डोइलउ दारुहस्तकः ।
कुघाट कुघाटः ।
कावडि कावाकृतिः ।
चूकउ चुक्तिः ।
आरती आरात्रिकम् ।
मंगलेवउ मङ्गलदीपकः ।
घत्तूरियउ घत्तूरितः ।
बूंब बुम्बा ।
सार सारा ।
गलणउ गलनकम् ।
दंतसूकट दन्तशकटः ।
खीचडउ क्षिप्रचटः ।
राब रब्बा ।
कणहतउ कणभक्तम् ।
वेगउ वेगवान् ।
ऊधारइ उद्धारके ।
वाहरू व्याहारकः ।
हेडाऊ हेडावित्तः ।
धरणइ धरणके ।
कूचउ कूर्चकः ।
पोटली पोट्टलिका ।
पोटलिया पोट्टलिकाः ।
नीसाण निःस्वानः ।
कांठलउ कण्ठकः ।
पाहरू प्राहरिकः ।
पीठी पिष्टिका ।
अखत्र अक्षत्रम् ।
ओंलग अवलगा ।
संधूख्यउ संधुक्षितः ।
पहुरइ प्रहरके ।
लालि लल्लिः ।
किलकिलाट किलकिलायितम् ।
वीह विभीषिका ।
तलार तलारक्षः ।
सेल शल्यः ।
साल शल्यम् ।
चूणि चूर्णिः ।
फाटउ स्फाटितम् ।
गोफणि गोफणी ।
ओठी औष्ट्रिकः ।
कापडी कार्पटिकः ।
विसोआ विंशोपकाः ।
सींगडी शृङ्गिका ।
चाकी चक्रिका ।
चकरडी चक्रिका ।
दोहणी दोहिनी ।
पूत्रेलउ पुत्रकः ।
गूजर गूर्जरः ।
गूजरी गूर्जरी ।
नाथियउ नस्तितः ।
अखाडउ अक्षपाटकः ।
दाणमंडही दानमण्डपिका ।
मूली मूलिका ।
सूली शूलिका ।
धुवउ ध्रुवकः ।
मढी मठिका ।
भमरडउ भ्रमरकः ।
गोमूत्री गोमूत्रिका ।
पूलउ पूलकः ।
पुडउ पुटकः ।
दाणउ दानकः ।
सींगउ शृङ्गकम् ।
किवाडी कपाटिका ।
कांवडी कंवाष्ठिका ।
सउणी शकुनिकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पावटउ पादावर्त्तः ।
गदहिला गर्दभिल्लाः ।
लात लत्ता ।
सेरी सेरिका ।
सीरवी सीरपतिः ।
नाहर नाखरः ।
रोझ रोह्यः ।
आखलउ आस्खलकः ।
निसरावउ निश्रावः ।
डहर दहरः ।
मुजल मुखजलम् ।
महुआल मधुजालम् ।
सिलावटउ शिलावर्तकः ।
जाडउ जाड्यम् ।
मुखास मुखास्था ।
दंतूसल दन्तमुसलः ।
रती रक्तिका ।
बीयउ बीजकः ।
अंकोडउ अंकुटकः ।
लट्टू लट्टा ।
वडी वटिः ।
धणिया धनीयम् ।
कहाणी कथानिका ।
खटमल खट्टामल्लः ।
भडिथ भडित्रम् ।
डाकर डाल्कारः ।
लींडी लिण्डिका ।
पाणी पानीयम् ।
पाण पानम् ।
जडी जटी, जटिका ।
सीअल शीतलिका ।
पाइणि पद्मिनी ।
पमोडी पद्मकर्कटी ।
वही वहिका ।
पान्हउ प्रस्रवः ।
आलावउ आलापकः ।
अद्देसउ उद्देशकः ।
रतांजणी रक्तचन्दनम् ।
खीरणी क्षीरिका ।
पतंग पत्राङ्गं पतङ्गं वा ।
कूंभट कुब्जकण्टकः ।
वहेडउ बहेटिकः, बिभेदको वा ।
धामण धर्मणः ।
लेसूडउ लेखशाटकः ।
गोखरू गोक्षुरः ।
कांडी कण्डी ।
भांखडी भस्त्रटः ।
मरूअउ मरुबकः ।
एलियउ ऐलेयम् ।
बेल बेला ।
खरहडी खरकाष्ठिका ।
देवालि देवतालि ।
कासुंदउ कासमर्दः ।
संद स्यन्दः ।
बीजाबोल बीजकबोलः ।
सातपरिया सप्तपर्यायाः ।
पवित्री पवित्रकम् ।
मुहछण मुखक्षणः ।
हाक हक्का ।
हासी हासिका ।
नवारसउ नवायसम् ।
चीलहसाग चिल्लीशाकम् ।
पाइली पल्ली ।
कुंभी कुंभिका ।
कंसाल कंसालः ।
त्राकडीचेलउ तुलाचेलकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुंपी कुम्पिका ।
कचोलउ कच्चोलकम् ।
कांगउ कगः ।
ग्वालेर गोपालगिरिः ।
घिसि घृष्टिः ।
परसु परश्वः ।
जमधारउ जन्मधारकः ।
गिलगिली गिलद्विलिका
बकोर बर्करिका ।
खयर वडी खदिरवटिका ।
धनागरउ धान्यनागरम् ।
काकडीरउ गिर कर्कट्या गिरः ।
कोरियउ पात्रउ कोरितं पात्रम् ।
कोरिवउ कोरणम् ।
सूंहाली सुकुमारिका ।
चीठी चीष्ठिका ।
दसेआगलउ दशभिरर्गलः ।
गादी गद्दिका ।
धीया न पुत्ता धीदा न पुत्रः ।
चाथ(प्र० वाघ)रि च(प्र० व)स्तरी ।
तूणियउ कापडउ तूर्णितं कर्पटम् ।
अढारइ नात्रा अष्टादशनात्रकाणि ।
नहरणी नखहरणी, नखरदनिका वा ।
नखांरउ समारिवउ नखानां समारणं समारचनं वा ।
सांजउ मात्राविना निरोध न करइ संयतो मात्रकं विना निरोधं न करोति ।
केलि कदली ।
केला कदलीफलानि ।
चवलांरी फली चपलकानां फल्यः ।
धोवणी धावनिका ।
जयणा यतना ।
सीलउ आहार वाइलउ हवइ शीतल आहारो वातलो भवति ।
वाछडउ गाइ धायउ वत्सको गां धावितवान् ।
पात्रांरउ काप पात्राणां कल्पः ।
मूठउ मुष्टः ।
रूठउ रुष्टः
तूठउ तुष्टः ।
राखडी रक्षाटिका ।
काकरउ कर्करः ।
संदेसउ संदेशकः ।
सोनारउ मणियउ सुवर्णस्य मणिकः ।
विरूयउ विरूपकम् ।
संथारउ संस्तारकः ।
पहिलउ आपइ पछइ बापइ प्रथममात्मनः पश्चाद्वप्तुः ।
वरसोला वर्षोपलः ।
तको आयउ तकः आगतः ।
तका मुहपती तका मुखपोतिका ।
दाम करइ काम द्रम्मः करोति कर्म ।
गहिलउ घणुं उतावलउ हवइ ग्रहिलो घनमुत्तालो भवति ।
आगी वीझाई अग्निर्विध्यातः ।
गुल गुलियउ गुडो गुल्यः ।
साकर मीठी शर्करा मिष्टा ।
आखा त्रीज अक्षततृतीया ।
भाउ बीज भ्रातृद्वितीया ।
दीवाली दीपालिका ।
होली होलिका ।
आंबइरा मउरा आम्रस्य मयूराः ।
लेसाल लेखशाला ।
पोसाल पोषधशाला
थांपणि स्थापनिका ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बाउची बाकुची ।
घर गृहं घरो वा ।
ओवउ अपवरकः ।
अंतेउरी अन्तःपुरिका ।
पातली लोवडी प्रतला लोमपटी ।
ऊतारणउ अवतारणकम् ।
तंबोली ताम्बूलिकः ।
गांधी गान्धिकः ।
तेली तैलिकः ।
हेवउ हेवाकः ।
मिठाई मृष्टादिका ।
सूंखडी सुखादिका ।
ऊभउ ऊर्द्धः ।
बइठउ उपविष्टः ।
तंबोल बीडउ ताम्बूलबीटकम् ।
आलजाल बोलइ आलजालं ब्रवीति ।
सीकारा मूकइ सीत्कारान् मुञ्चति ।
पोईस पूतिकेशः ।
छानउ छन्नः ।
परताति परतप्तिः ।
राइणि राजादनी ।
कुंअरि कुमारी ।
गिलो गडूची ।
आंबारी कातली आम्रकर्त्तलिका ।
पुहुंक पृथुकम् ।
पहूआ पृथुकाः ।
टांक टङ्कः ।
मासउ मापकः ।
आक अर्कः ।
नींबू निम्बुकः ।
सिरघू शिग्रुः ।
छीकउ शिक्यम् ।
थूणी स्थूणी ।
थांभउ स्तम्भः ।
सीविवउ सीवनम् ।
सांडसउ संदंशः ।
मणिआर मणिकारः ।
आंबिली आम्लिकी ।
गाडी गर्त्ती ।
डांस दंशः ।
मसउ मशकः ।
अरडूसउ अटरूषः ।
मोरसिखा मयूरशिखा ।
महुलेठी मधुयष्टिः ।
अरीठउ अरिष्टः ।
लहसण लशुनः ।
गाजर गृञ्जनम् ।
किरातउ किरातः ।
जीवापोता पुत्रजीवकः ।
थूथउ तुच्छम् ।
दीवडी दृतिः ।
भांगरउ भृङ्गराजः ।
अतिविस अतिविषा ।
घाणी घानाः ।
सातू सक्तवः ।
घरी जाली गृहस्य जालिका ।
गउख गवाक्षः ।
बाण संधियउ बाणः सन्धितः ।
ऊंचउ ऊछालियउ उच्चमुच्छालितः ।
फलहउ फलिहकः ।
झाड झाटः ।
सूआर सूपकारः ।
रसोई रसवती ।
सोनाररी मूस सुवर्णकारस्य मूषा ।
कुंभार हांडी घडइ कुम्भकारो हण्डिकां घटयति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सांखडि संखडिः संस्कृतिर्वा ।
वीवाहपगरण विवाहप्रकरणम् ।
पढमाली प्रथमालिका ।
कोठार कोष्ठागारम् ।
भंडार भाण्डागारम् ।
अरहट अरघट्टः ।
घरटी घरिट्टिका ।
घरट घरट्टः ।
चमार चर्मकारः ।
वाणही उपानत् ।
सूपडउ सूर्पकम् ।
चालणी चालनी ।
नीसा निश्रा ।
लोढउ लोष्टकः ।
दल दलिः ।
नीसरणी निःश्रेणिः ।
पोली पोलिका ।
पूडा पूपकाः ।
वडी वटिका ।
वडा वटकाः ।
लाडू लड्डुकाः ।
खाजा खाद्यकानि ।
ऊकरडी उत्कुरुटिका ।
दुक्खइ करालियउ दुःखेन करालितः ।
साधुसंघाडउ साधुसंघाटकः ।
त्रेगति (डि) त्रिकाष्ठिका ।
तेरइ काठिया त्रयोदश काष्ठिकाः ।
सूतउ घोरइ सुप्तो घोरयति ।
सीयालउ शीतकालः ।
उन्हालउ उष्णकालः ।
घडियालउ घटिकालयः ।
घडी घटिका ।
पहर प्रहरः ।
दीह दिवसः ।
राति रात्रिः ।
वरसात वर्षारात्रः ।
रखवालउ रक्षपालः ।
वासउ वासकः ।
कोठउ कोष्ठकः ।
ओही वींट उपधिवेण्टलिका, उपधिवेष्टिका वा ।
वेसाघाडउ वेश्यापाटकः ।
दंडाउंछणउ दण्डकपुञ्छनम् ।
घीरी तरी घृतस्य तरिका ।
ऊकुडउ उत्कुटुकः ।
ऊकडू (प्र०) उत्कुटकः ।
गिलोई गिरोलिका ।
गोआडइरउ खात्र गोवाटकस्य क्षात्रम् ।
पडजीभी प्रतिजिह्वा ।
फोडी स्फोटिका ।
आजिकाल्हि जतियांरउ घण ठाणउ छइं अद्यकल्पे यतीनां घनस्थानकमस्ति ।
दयामणउ दयामनकः ।
निसूग निःशूकः ।
ससूग सशूकः ।
निद्धंधस निर्द्धन्धसः ।
भाणउ भाजनम् ।
थाल स्थालम् ।
थाली स्थालिका ।
रांधणउ रन्धनम् ।
कातती कर्त्तन्ती ।
पींजती पिञ्जन्ती ।
पीसती पिंषन्ती ।
मूंदडी मुद्रिका ।
सांकली संकलिका ।
सरसवेल सर्षपतैलम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अलसिवेल अतसीतैलम् ।
जावेल जात्यतैलम् ।
कडुछी कटुच्छिकिका ।
कडुछउ कटुच्छकः ।
उवाणउ ठाण उद्वानं स्थानम् ।
चेलउ कहियइ धेणू गाइ चेल्लकः कथ्यते धेनुर्गौः ।
वाउलि वातोली ।
लूणकयरा लवणकरीराणि ।
पाउंछणउ पादपुञ्छनकम् ।
ओघउ ओघः ।
निसेजा निषद्या ।
चोलवटउ चोलपट्टः ।
पछेवडी प्रच्छादपटी ।
पडघउ पतद्ग्रहम् ।
वींटणउ वेष्टनकम् ।
कीटी किट्टिका ।
वानी वर्णिका ।
वानगी वर्णिका ।
पलीवणउ प्रदीपनकम् ।
राजबी राजबीजी ।
काज नीवडियउ कार्यं निर्वर्तितम् ।
जोगवटउ योगपट्टः ।
नवकारवाली नमस्कारमालिका ।
जपमाली जपमालिका ।
ऊछीनउ उच्छिक्तम् ।
खत उपरि खार दीधउ क्षतस्योपरि क्षारो दत्तः ।
कडू कटुकम् ।
निसोत निःश्रोतः ।
वज वचा ।
तज त्वक् ।
राठऊड राष्ट्रकूटः ।
पमार परमारः ।
सोलंकी चौलुक्यः ।
पोरवाड प्राग्वाटः ।
भाट भट्टः ।
ऊड उड्रः ।
ओड ओड्रः ।
थूभ स्तूपम् ।
थडउ स्थलकम् ।
रूंख रुक्षः (वृक्षः ?)
वाडी वाटिका ।
देवदत्त अधूरउ पूरिसइ देवदत्तः अर्द्धं पूरयिष्यति ।
आठउ अष्टकः ।
लेव लेपः ।
घूंटउ घट्टकः ।
आंबाफाड आम्रफाली ।
पूगीफाड पूगीफलफाली ।
गवाणि गवादनी ।
रूतउ रुतः ।
कुपियउ कुपितः ।
ऊग्रहणी उद्ग्रहणिका ।
छींडी खण्डी ।
पुत्रि जायइ वधामणउ पुत्रे जाते वर्द्धमानकम् ।
घूघुरउ घुर्घुरः ।
सेई सेतिका ।
मुंडउ मुण्डकः ।
कूटणउ कुट्टनम् ।
पीटणउ पिट्टनम् ।
दीवाकाणउ दीपकाणः ।
फरलउ फरलः ।
कोटवाल कोट्टपालः ।
ऊघाडिवउ उद्घाटनम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुलपापडी गुडपर्पटिका ।
गुलधाणी गुडधानाः ।
वलउ वलकः ।
पीढी पीठी ।
छाजउ छाद्यकम् ।
देहरइ आमलसारउ
देवगृहे आमलसारकः ।
गजथर गजस्तरः ।
साभरमती साभ्रमती नदी ।
जउणा यमुना ।
पारस पाहाण स्पर्शपाषाणः ।
चित्रावेलि चित्रकवल्ली ।
गदगदवचन गद्गदवचनम् ।
मणमणउ मन्मनः ।
दादर दर्दरः ।
जाजरउ जर्जरः ।
झालरि झल्लरिका ।
मरमरसबद मर्मरशब्दः ।
तमक तमकः ।
राजान राजानकः ।
रोहीडउ रोहीतकः ।
नारिंग रूंख नारङ्ग रु(वृ?)क्षः ।
धींगउ धींगः ।
अनाड अनाटः ।
ऊकरडउ उत्कुरुटः ।
अखोड अक्षोटः ।
भांड भण्डः ।
चोरडउ चोरटः ।
लउडउ लकुटः ।
चीकणउ चिक्कणः ।
मायउ मातः ।
गाह गाधा ।
सीथ सिक्थः ।
साथ सार्थः ।
पह पथः ।
माजणउ मज्जनम् ।
जुवान युवानः ।
पोथउ पुस्तकम् ।
त्रापउ तर्पः ।
रांपी रम्पा ।
वेढिमी वेष्टिमा ।
करंबउ करम्बः ।
खेडउ खेटकः ।
पाद्र पद्मम् ।
सीर सिरा ।
पांजरउ पञ्जरः ।
दोरउ दवरकः दोरो वा ।
छीतर छित्वरः ।
चोरइ खात्र पाड्यउ
चौरेण खात्रं पातितम् ।
मादल मर्दलः ।
बाउल बब्बूलः ।
हींडि हिण्डिः ।
कडणि कटिनिः ।
पापड पर्पटः ।
कारटउ कारटकम् ।
कारटियउ कारटिकः ।
धड घटः ।
खण क्षणः ।
डहरउ दहरः ।
पींडार पिण्डारः ।
खारउ क्षारम् ।
खप्पर खर्परम् ।
खापरउ खर्परः ।
चरू चरुः ।
गात्री गात्रिका ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मई मदी ।
चीखल चिक्खल्लः ।
पाटउ पट्टः ।
राजारउ पटउ राज्ञः पट्टः ।
खाली खिल्ली (प्र० खल्ली)[1] ।
ताल तल्लः ।
गोलउ गोलकः ।
वाउल वातूलः ।
भमलि भ्रमलः, भ्रमिर्वा ।
कमलउ कामलः ।
हींगवणि हिङ्गुपर्णी ।
आरति अर्त्तिः ।
नीठि निष्ठा ।
धूआ धुत्रा ।
धू धुवः ।
माणी मानिका ।
नीक नीका[2] ।
कणी कणिका ।
मजीठ मञ्जिष्ठा ।
ऊन ऊर्णा ।
प्रतीठ प्रतिष्ठा ।
पाज पद्या ।
सेस शेषा ।
ईस ईषा ।
भालि भल्लिः ।
पालि पल्लिः ।
चाचरि चच्चरिः ।
खली खलिः ।
तूली तूलिः ।
फूटी काकडी स्फुटिकर्कटी ।
कांबी कम्बिः ।
वेठि विष्टिः ।
गिरठि गृष्टिः ।
काणि कानिः ।
पासाकेवली पाशकेवली ।
संधूखण संधुक्षणम् ।
नाणउ नाणकम् ।
पींगाणउ पिंगाणम् ।
पिंगाणी पिङ्गाणिका ।
सयरइ वलि शरीरे वलिः ।
कुढि कुष्ठी ।
कुट्टि कुष्ठी ।
हुडुक हुडुक्कः ।
मोगरउ मुद्गरम् ।
अंकोल अङ्कोठः ।
वाटि वर्त्तिः ।
आखउ अक्षतः ।
आखा अक्षताः ।
आबू अर्बुदः ।
खीरणी क्षीरिणी ।
क्यारउ केदारः ।
दीवमंदिर द्वीपमन्दिरः ।
पुडउ पुटः ।
पडल पटलम् ।
कांदउ कन्दः ।
डोडी दोडी ।
काठीहारउ काष्ठाहारकः ।
हींडिया हिण्डिकाः ।
राउलउ राजकुलम् ।
वाटली वर्त्तुलिका ।
थली स्थली ।
सालवी शालापतिः ।

ग्रन्थान्तरे टिप्पनकम्—१ हस्तपादावमर्दनो रोगः । २ सारिणिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जोडउ यौटकम् ।
अणहारउ अनुहारः ।
आंक अङ्कः ।
कोडिटंका भाडउ कोटिटंका भाटकम् ।
रांक रङ्कः ।
साग शाकम् ।
हरी हरितकम् ।
सूग शुका ।
वधूवर पुंखियउ वधूवरं पुंखितम् ।
सिघ शिखा ।
गूंद गोन्दः ।
खजूर खर्जूरम् ।
खजूरउ खर्जूरकः ।
राई राजिः ।
सांन सञ्ज्ञा ।
आटउ अट्टः ।
चून चूर्णम् ।
चूनउ चूर्णकः ।
कुंढ कुण्ठम् ।
कूड कूटम् ।
व्रणरउ पाटउ व्रणस्य पट्टः ।
सिलापट शिलापट्टः ।
मांचइरी वडी मञ्चकस्य वटी ।
वाटभोजन वाटभोजनम् ।
वाडि वृतिः ।
कूआकंठइ कूपकण्ठे ।
तपरी काष्ठा तपसः काष्ठा ।
कुंढगोठि कुण्ठगोष्ठी ।
कुंठसस्त्र कुण्ठं शस्त्रम् ।
कोठउ असुद्ध कोष्ठः अशुद्धः ।
निवायउ कोठउ निर्वातः कोष्ठः ।
नीठ कियउ निष्ठया कृतः ।
भली निष्टा भव्यनिष्ठा ।
छट्ठीलिखित षष्ठीलिखितम् ।
तापसरी कुण्डी तापसस्य कुण्डी ।
तीरथइ कुंड तीर्थे कुण्डः ।
खंडी थाली खण्डी स्थाली ।
खांडउ गोधउ खंडो गोधवः ।
पिण्डखजूर पिण्डीखर्जूरम् ।
प्रसादरा खण प्रासादस्य क्षणाः ।
कूंभीउपरि थांभउ कुम्भ्या उपरि स्तम्भः ।
वस्तुरी वाणि वस्तुनो वाणिः ।
जायउ पूत जातः पुत्रः ।
रातउ रक्तः ।
विरतउ विरक्तः ।
लोकांरी सोइ लोकानां श्रुतिर्वार्त्ता ।
वस्त्रगांठि वस्त्रग्रन्थिः ।
गलगांठी गलग्रन्थयः ।
मांदउ मन्दः ।
रांधउ धान रन्ध्यं धान्यम् ।
गंगेटी गङ्गेष्टिका ।
गाभरू गर्भरूपम् ।
वाछरू वत्सरूपाणि ।
वाछडा वत्सकाः ।
ठाणउ स्थानकम् ।
वणी वनी, ह्रस्वं वनम् ।
कांसीवाजउ कांस्यवाद्यम् ।
सीख शिक्षा ।
छुरउ छुरः ।
खुरउ क्षुरः ।
कुंभाररउ चाक कुम्भकारस्य चक्रम् ।
कपीलउ काम्पिल्यम् ।
टार टारः ।
धानघीरी तरी धान्यघृतस्य तरी अवस्था ।
सापरउ दर सर्पस्य दरः
डर दरः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नेत्रउ नेत्रम् ।
सीहरी फाल सिंहस्य फालः ।
फालरउ परिधान फालस्य परिधानम् ।
घररा वला गृहस्य वलयः ।
रूखउ रूक्षम् ।
पासउ पार्श्वम् ।
खाटकी खट्टिकः ।
हाटडी हट्टिका ।
माथइ खोल मस्तके खोलकः ।
सेजगंडूआ शय्यागण्डकाः ।
धणिया ओसड धनिका ओषधम् ।
घरधणियाणी गृहधनिका ।
पाडउ पाटकः ।
साथियउ स्वस्तिकः ।
भस्मसूत भस्मसूत्रकम् ।
सूआ सूचकाः ।
बीजी भूमि द्वितीया भूमिका ।
भूमिका रचना ।
काकींडउ कर्कंडः, काकपिण्डः ।
दोहडउ दोहटः ।
चीपिडउ चिपिटः ।
गायांरउ चरउ गवां चरणम् ।
मकनउ हाथी मत्कुणो हस्ती ।
करमदउ करमर्दकः ।
घूघुरी घूर्घुरी ।
तिल पील्या तिलाः पीडिताः ।
गलहथउ गलहस्तः ।
गामरउ गोयरउ ग्रामस्य गोचरः ।
कुंआरीरी घाघरी कुमार्या घर्घरी ।
कुंमारउ सोनउ कुमारं सुवर्णम् ।
कूवडउ कूपरः ।
दादुर वाजउ दर्दुरवाद्यम् ।
नांगर नागरम् ।

देहरइरउ निकरउ देवगृहस्य निकरः ।
वालर काकडी वल्लूरकर्कटी ।
कुचेल कुचेलः ।
पुष्फपडली पुष्पपटली ।
मयणहल मदनफलम् ।
खडगरउ पडीआर खड्गस्य प्रत्याकारः ।
वाहर व्याहरा ।
वाहरू व्याहरिकः ।
गुणणी गुणनिका ।
घाघर नदी घर्घरिका नदी ।
चउपउ चतुष्पदम् ।
छीकणी छिक्किका ।
कसी कषीका, कशी वा ।
कुसि कुशा ।
समि कियउ समीकृतः ।
सिम कियउ सिमीकः ।
पालणउ पालनकम् ।
परचूरणि लेखउ प्रचूर्णि लेख्यकम् ।
बावनउ चंदन द्विपञ्चाशकं चन्दनम् ।
पादरियउ पाद्रिकः ।
गामडिउ ग्रामटिकः ।
धूणियउ धूनितम् ।
कुरुटतउ कुरुटन्, कुरुट धातुः ।
रुलियउ रुलितः, रुल धातुः ।
खेलणउ खेलनकम् ।
क्याणारी भरणी क्याणकानां भरणिका ।
वलतउ वलन् ।
ऊवलतउ उद्वलन् ।
गलहथियउ गलहस्तितः ।
लाहणउ लाभनकम् ।
हाडफूटि हड्डस्फोटिः ।
झामलउ ध्यामलम् ।
नीठियउ निष्ठितम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कांठउ कण्ठकः ।
गोहूंरी थूली गोधूमानां स्थूला ।
रवऊ रवकः ।
पाजणी पर्यायणिका ।
अंधमूंधपणइ अन्धमुष्टिकया ।
वणयउ वयनम् ।
पहिरयउ परिहितम् ।
आधासीसी अर्द्धशीर्षी ।
काकडासींगी कर्कटश्रृङ्गिका ।
नासिवा करतउ नष्टुं कुर्वन् ।
मेथीरा लाडू मेथ्या लड्डुकानि ।
पीपलरी पीपी पिप्पलस्य पिप्पका ।
विहाणउ विभातम् ।
बहिरउ बधिरः ।
सिरीस शिरीषः ।
फूटरउ स्फुटतरः ।
जानीयासउ जन्याधासकः ।
ऊधंधलु उद्धूलिकम् ।
उसीआलु अस्पृष्टालयम् ।
घूंघटउ अवगुण्ठनम् ।
आहर जाहर एहिरे याहिरा ।
चांद्रिणु चन्द्रिकालयम् ।
धणीवउ धन्यवयाः ।
नीखणियामउ निःक्षणकर्मी ।
मेराईउ मेराबकम् ।
वादलउ वारिदपटलम् ।
अभोखउ अभ्युक्षणम् ।
ओलखउ उदकोदञ्चनः ।
पछोकडउ पश्चादोकः ।
उपवासीउ उपोषितः ।
पोसहथउ पोषधस्थः ।
हियाविउं हृदयार्पितम् ।
फुईहाई पितृष्वस्रीयः ।
मासिहाई मातृष्वस्रीयः ।
मामउ मामकः ।
मामी मामकी ।
पाडूआली पादप्रहारिणी ।
अरत परत चाप सरीखउ
आकृत्या प्रकृत्या बप्पसदृशः ।
अंगीठउ अग्निपीटम् ।
ऊघड दूघडउ उद्घटदुर्घटम् ।
चीफाड चित्तस्फोटकः ।
निलखणउ निर्लक्षणः ।
अहीणुं अधेनुकम् ।
उपरि ठाई उपरिस्थायी ।
कांकसी कचाकर्षणी ।
हथीयार हस्ताधारः ।
कउसीसउ कपिशीर्षकम् ।
मुखामुखि मुखामुख्यता ।
गोगीडउ गोकीटः ।
ओलउ उपालयः ।
नीकउ निष्कः ।
कल्होडउ कलभोत्कटः ।
आलीगारउ अलीकंकारः ।
पाडू पादघातः ।
दीवी दीपिका ।
भंजवाड भङ्गपातः ।
पडाई पताकिका ।
पेलावेलि प्रेराप्रेरि ।
वियारियउ विप्रतारितः ।
छेतरियउ छलान्तरितः ।
दडबडाइउ द्रवकधावितः ।
खाजहलउ खाद्यफलम् ।
पीजहलउ पेयफलम् ।
वाउलउ वार्त्तालयः ।
ऊजाणी उद्यानिका ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भोगल भुजार्गला ।
मेहरू महत्तरः ।
देखाविखि दृष्टापेक्षा ।
वरांसियउ विपर्यस्तः ।
आज अद्य ।
काल्हि कल्ये ।
परम परे ह्यि: ।
अरीम अपरेद्युः । अन्यस्मिन्नहनि ।
अन्येद्युः ।
आजूणउ अद्यतनम् ।
काल्हूणउ कल्यतनम्, ह्यस्तनम् ।
हिवडां इदानीम् ।
अहुण अधुना ।
हिवडांनुं आधुनिकम् ।
मुहिया मुधा ।
जिम यथा ।
तिम तथा ।
जां यावत् ।
तां तावत् ।
एकवार एकदा ।
सवइवार सर्वदा ।
जहियइ यदा ।
तहियइ तदा, तदानीम् ।
कहियइ कदा ।
अनेरीवार अन्यदा ।
किहां कुत्र, क ।
जिहां यत्र ।
तिहां तत्र ।
इहां अत्र ।
अनेतइ अन्यत्र ।
सगलइ सर्वत्र ।
झटकइ झटिति ।
जूउ युतः ।
ताहरुं त्वदीयम् ।
माहरुं मदीयम् ।
तुम्हारुं युष्मदीयम् ।
अम्हारुं अस्मदीयम् ।
किसउ कीदृशः ।
जिसउ यादृशः ।
तिसउ तादृशः ।
इसउ ईदृशः ।
अनेसउ अन्यादृशः ।
अम्हसरीषउ अस्मादृशः ।
तूंसरीषउ त्वादृशः ।
मूंसरीषउ मादृशः ।
तुम्हसरीषउ युष्मादृशः ।
जेतलुं यावन्मात्रम् ।
तेतलुं तावन्मात्रम् ।
एतलुं एतावन्मात्रम्, इयन्मात्रम् ।
केतलुं कियन्मात्रम् ।
ओरहुं अर्वाक् ।
परहउ परतः ।
बाहिरि बहिः, बाह्ये ।
एकपरि एकधा ।
बिहुंपरि द्विधा ।

इत्यादि ।

'जडपणउ' इत्यादौ भावे त—त्वौ यण वा । जडता, जडत्वं, जाड्यम् ।
अहुण ऐषमः, परुः परुत् ।
एक एकत्वसंख्यायामिलेकः । 'तीशोली'ति कः ।
बि द्वौ पुमांसौ, स्त्रियौ, कुले च ।
दडउ द्व्यर्द्धः ।
अडी अर्द्धतृतीयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रिण्ह त्रयः, तिस्रः, त्रीणि, पुमांसः, स्त्रियः, कुलानि वा। 'उभेर्द्वुत्रौ' वेत्यनेन 'उभ पूरणे' इत्यस्मादिः प्रत्ययोऽस्य च द्वुत्रेत्यादेशौ ।

चारि चत्वारः, चतस्रः, चत्वारि। 'चतेरुर्' इत्यनेन 'चतेग् याचने' इत्यस्मादुरप्रत्ययः ।

पांच पञ्च 'पचुङ् व्यक्तीकरणे' 'उक्षि-तक्षी'त्यन् प्रत्ययः ।

छ षट् 'सहेः षष् च' इत्यनेन 'षहि मर्षणे' इत्यस्मात् किप्, षष् चास्यादेशः ।

सात सप्त 'षण्यशौटिभ्यां तन्' इत्यनेन 'षप् समवाये' इत्यस्मात्तन् प्रत्ययः ।

आठ अष्ट 'अशौटि व्याप्तौ' इत्यस्मात् 'षण्यशौटिभ्यां तन्' इत्यनेन तन् प्रत्ययः ।

नव निधान, नव निधानानि, 'णुक् स्तुतौ' इत्यस्मात् 'उक्षि-तक्षी' त्यन् ।

दस दशयन्ते दश । 'ळूपूयूवृषी'ति किदन् ।

इग्यारह एकादश ।

बारह द्वादश ।

तेरह त्रयोदश ।

चउद चतुर्दश ।

पनर पञ्चदश ।

सोल षोडश ।

सतर सप्तदश ।

अढार अष्टादश ।

इगुणवीस एकोनविंशतिः ।

वीस द्वौ दशतो[1] मानमेषां संख्येयानामस्य वा संख्यानस्य विंशतिः । 'विंशत्यादय' इत्यनेन द्वेर्दशदर्थे विभावः । शतिश्च प्रत्ययः ।

इकवीस एकविंशतिः ।

बावीस द्वाविंशतिः ।

त्रेवीस त्रयोविंशतिः ।

चउवीस चतुर्विंशतिः ।

पंचवीस पञ्चविंशतिः ।

छावीस षड्विंशतिः ।

सत्तावीस सप्तविंशतिः ।

अट्ठावीस अष्टाविंशतिः ।

इगुणत्रीस एकोनत्रिंशत् ।

त्रीस त्रयोदशतो मानमेषां संख्येयानामस्य वा संख्यानस्य त्रिंशत् । 'विंशत्यादयः' इत्यनेन त्रेरिन् भावः । शच्च प्रत्ययः ।

एकत्रीस एकत्रिंशत् ।

बत्रीस द्वात्रिंशत् ।

तेत्रीस त्रयस्त्रिंशत् ।

चउत्रीस चतुस्त्रिंशत् ।

पइंत्रीस पञ्चत्रिंशत् ।

छत्रीस षड्त्रिंशत् ।

सइंत्रीस सप्तत्रिंशत् ।

अठत्रीस अष्टात्रिंशत् ।

इगुण चालीस एकोनचत्वारिंशत् ।

चालीस चत्वारो दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य चत्वारिंशत् । 'विंशत्यादयः' इत्यनेन चतुरश्चत्वारि भावः शच्च प्रत्ययः ।

---

१ त्रयो दशतः=त्रिवारदशतः=वारत्रयदशतः, इति भावः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इगतालीस **एकचत्वारिंशत्**।
बयालीस **द्विचत्वारिंशत्**।
त्रेतालीस **त्रिचत्वारिंशत्**।
चउमालीस **चतुश्चत्वारिंशत्**।
पचतालीस **पञ्चचत्वारिंशत्**।
छयालीस **षट्चत्वारिंशत्**।
सइतालीस **सप्तचत्वारिंशत्**।
अठतालीस **अष्टचत्वारिंशत्**।
इगुणपचास **एकोनपञ्चाशत्**।
पचास **पञ्च दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य पञ्चाशत्, 'विंशत्यादयः' इत्यनेन शत्प्रत्ययः, पञ्चन आत्वं च**।
इक्कावन **एकपञ्चाशत्**।
बावन **द्विपञ्चाशत्**।
त्रिपन **त्रिपञ्चाशत्**।
चउपन **चतुष्पञ्चाशत्**।
पंचावन **पञ्चपञ्चाशत्**।
छपन **षट्पञ्चाशत्**।
सत्तावन **सप्तपञ्चाशत्**।
अठावन **अष्टपञ्चाशत्**।
इगुणसठि **एकोनषष्टिः**।
साठि **षष्टिः। षट् दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य षष्टिः, 'विंशत्यादयः' इत्यनेन षष्तिः षश्च**।
इगसठि **एकषष्टिः**।
बासठि **द्वाषष्टिः**।
त्रेसठि **त्रिषष्टिः**।
चउसठि **चतुःषष्टिः**।
पइंसठि **पञ्चषष्टिः**।
छासठि **षट्षष्टिः**।
सतसठि **सप्तषष्टिः**।
अडसठि **अष्टषष्टिः**।
इगुणहत्तरि **एकोनसप्ततिः**।
सत्तरि **सप्त दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य सप्ततिः। 'विंशत्यादयः' इत्यनेन सप्तनस्तिः**।
इगहत्तरि **एकसप्ततिः**।
बिहत्तरि **द्विसप्ततिः**।
त्रिहत्तरि **त्रिसप्ततिः**।
चउहत्तरि **चतुःसप्ततिः**।
पंचहत्तरि **पञ्चसप्ततिः**।
छहत्तरि **षट्सप्ततिः**।
सतहत्तरि **सप्तसप्ततिः**।
अठहत्तरि **अष्टसप्ततिः**।
इगुण्यासी **एकोनाशीतिः**।
असी **अष्टौ दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य अशीतिः, 'विंशत्यादयः' इत्यनेन तिप्रत्ययः, अष्टनोऽशी च**।
इक्यासी **एकाशीतिः**।
ब्यासी **द्व्यशीतिः**।
त्र्यासी **त्र्यशीतिः**।
चउरासी **चतुरशीतिः**।
पंचासी **पञ्चाशीतिः**।
छयासी **षडशीतिः**।
सत्यासी **सप्ताशीतिः**।
अठ्यासी **अष्टाशीतिः**।
नव्यासी **नवाशीतिः, एकोननवतिर्वा**।
निऊ **नव दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नवतिः विंशत्यादयः' इत्यनेन नवनस्तिः ।

इक्काणू **एकनवतिः ।**
बाणू **द्विनवतिः ।**
त्र्याणू **त्रिनवतिः ।**
चउराणू **चतुर्नवतिः ।**
पंचाणू **पञ्चनवतिः ।**
छिन्नू **षण्णवतिः ।**
सत्ताणू **सप्तनवतिः ।**
अठाणू **अष्टनवतिः ।**
नवाणू **नवनवतिः ।**

सउ **दश दशतो मानमेषां संख्येयानामस्य वा संख्यानस्य शतम् । 'विंशत्यादयः' इत्यनेन दशानां शभावः तश्च प्रत्ययः ।**

एकोत्तर सउ **एकोत्तरं शतम् ।**
बिडोत्तर सउ **द्व्युत्तरं शतम् ।**
तिडोत्तर सउ **त्र्युत्तरं शतम् ।**
चउडोत्तर सउ **चतुरुत्तरं शतम्, इत्यादि नवनवतिं यावत्पूर्वोक्तसंख्याशब्दा उत्तरशब्दपरा योज्याः ।**

सहस सहस्रम् ।
लाख लक्षम् ।
कोडि कोटिः ।
बीजउ द्वितीयः ।
त्रीजउ तृतीयः ।
चउथउ चतुर्थः ।
पांचमउ पञ्चमः ।
छट्ठउ षष्ठः ।
सातमउ सप्तमः ।
आठमउ अष्टमः ।
नवमउ नवमः ।
दसमउ दशमः ।
इग्यारमउ एकादशः ।
बारमउ द्वादशः ।
तेरमउ त्रयोदशः ।
चउदमउ चतुर्दशः ।
पनरमउ पञ्चदशः ।
सोलमउ षोडशः ।
सतरमउ सप्तदशः ।
अठारमउ अष्टादशः ।

*

प्राच्यानां मते—**एकादशमः, द्वादशमः, त्रयोदशमः, चतुर्दशमः, पञ्चदशमः, षोडशमः, सप्तदशमः, अष्टादशमः, इति सपूर्वपदादपि नन्तादू मो भवति ।**

इगुणीसमउ एकोनविंशतितमः, एकोनविंशो वा । **वीसमउ** विंशतितमः, विंशो वा ।
एकवीसमउ एकविंशतितमः एकविंशो वा ।

एवं नवनवतिं यावत्सर्वत्र डट्-तमटौ पर्यायेण योज्यौ । षष्टिसप्तत्यशीतिनवतिशब्देभ्यः संख्यापूर्वपदेभ्यः संख्यापूरणे तमडेव, न डट् । षष्टितमः, सप्ततितमः, अशीतितमः, नवतितमः । सोपपदेभ्यस्तूभावपि एकषष्टितमः एकषष्टः, एकसप्ततितमः एकसप्ततः, एकाशीतितमः एकाशीतः, एकनवतितमः एकनवतः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सउमउ शततमः ।
सहसमउ सहस्रतमः ।
लाखमउ लक्षतमः ।
कोडिमउ कोटितमः ।
मासमउ दिहाडउ मासतमं दिनम् ।
इग्यारमी एकादशी, एकादशमी वा ।
बीसमी विंशतितमी, विंशी वा ।
त्रिवायउ त्रिपादः ।
चारोली चारकुलिका ।
धाहडी धातकी ।
थीणउ घी स्नानं घृतम् ।
मकोडउ मत्कोटः ।
थुड स्थुडम् ।
उगमुगउ अवाग्मूकः ।
इंडउ अण्डकः ।
ओलखाणउ उपलक्षणम् ।
सामाई सामायिकम् ।
एकासणउ एकासनकम् ।
ब्यासणउ द्व्यासनकम् ।
आंबिल आचाम्लम् ।
निवी निर्विकृतम् ।
पाडिहारू प्रातिहारिकम् ।
नोहली नवफलिका ।
राइतउ राजिकातिक्तम् ।
केवलउ क केवलः क ।
कानइ का कर्णे का ।
पच्छिम कि पश्चिमायां कि ।
अगिम की अग्रिमायां की ।
लहुडइ कु लघुके कु ।
दीरघइ कू वृद्धौ कू ।
एमात्र के एकमात्रायां के ।
बिमात्र कै द्विमात्रयोः कै ।
कानमात को कर्णमात्रयोः को ।
बिमातकाना कौ द्विमात्रकर्णेषु कौ ।
मस्तकमींढइ कं मस्तकबिन्दौ कं ।
आगलमींढइ कः अग्रे बिन्दोः कः ।
पडिवा प्रतिपत् ।
बीज द्वितीया ।
तीज तृतीया ।
चउथि चतुर्थी ।
पांचमि पञ्चमी ।
छठि षष्ठी ।
सातमि सप्तमी ।
आठमि अष्टमी ।
नवमि नवमी ।
दसमि दशमी ।
अग्यारसि एकादशी ।
बारसि द्वादशी ।
तेरसि त्रयोदशी ।
चउदसि चतुर्दशी ।
पूनिम पूर्णिमा ।
अमावसि अमावास्या ।
जइ किम्हइ यदि कथमपि, चेत् ।
पछइ पश्चात् ।
पाछिलउ पाश्चात्यम् ।
साम्हउ संमुखम् ।
सूगामणउ शूकाजनकम् ।
परायउ परकीयम् ।
अजी अद्यापि ।
तांइ तथापि ।
सांझ सन्ध्या ।
पडूंचउ प्रतिभाव्यम् ।
चउघडिउ चतुर्घटिकम् ।
उसूर उत्सूरः ।
आधु अर्द्धः ।
पूरउ पूर्णः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उइलउ अर्वाचीनम् ।
परलउ पराचीनम् ।
अऊठ अर्द्धचतुर्थः ।
साढापांच सार्द्धपञ्चकम् ।
कांइ कुतः, कस्मात्, किम् वा ।
दूबलउ दुर्बलः ।
रलीयामणउ रतिजनकम् ।
उदेगामणउ उद्वेगजनकम् ।
सोहामणउ सौभाग्यवान् ।
अगेवाण अग्रानीकः ।
चउकीवट चतुष्कपट्टः ।
ओरीसउ अवघर्षः ।
सालणउ शालनकम् ।
सिली शिलाका ।
पडसाल प्रतिशाला ।
आंगणउ अङ्गणम् ।
बारवट द्वारपट्टः ।
भारउट भारपट्टः ।
खूणउ कोणकम् ।
डेहली देहली ।
भीति भित्तिः ।
टीपणउ टिप्पनकम् ।
पाटी पट्टिका ।
पोथी पुस्तिका ।
छोह सुधा ।
भीतरउ अभ्यन्तरम् ।
चउगठि चतुष्काष्टिका ।
पहिरणउ परिधानम् ।
आडण अङ्गमण्डनम् ।
पांगुरणउ प्रावरणम् ।
टीलउ तिलकः ।
बहुरखउ बाहुरक्षकः ।
मुंदडी मुद्रिका ।
कडिदोरउ कटीदवरकः ।
पग पदः ।
लीह रेखा ।
हीअउ हृदयम् ।
थण स्तनौ ।
रूं रोम ।
भूहिरउ भूमिगृहम् ।
पाइक पादातिकः ।
सागडी शकटिकः ।
दडउ कन्दुकः ।
तलाउ तटाकः ।
बहेडउ द्विघटकम् ।
चहुंटी चञ्चुपुटिका ।
कावडि कपोती ।
गरढउ गतार्धवयाः ।
वेगड विकटशृङ्गः ।
पयंतरउ प्रत्यन्तरम् ।
डोकरउ दोलत्करः ।
सीरामण शीताशनम् ।
सउडि संवृतिः ।
सीरख शीतरक्षिका ।
तुलाई तूलिका
मासी मातृष्वसा ।
फुई पितृष्वसा ।
भउजाई भ्रातृजाया ।
बिउणउ द्विगुणम् ।
तिउणउ त्रिगुणम् ।
चउगुणउ चतुर्गुणम् ।
वुहरउ व्यवहर्त्ता ।
कडब कणाबा ।
दोटी द्विपटी ।
निद्रालखउ निद्रालक्षः ।
सांडसउ संदंशकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाथडी भस्त्रा ।
खाट मञ्चिका ।
घडामांची घटमञ्चिका ।
आरती आरात्रिका ।
पोली प्रतोली ।
गंभारउ गर्भागारम् ।
देउली देवकुलिका ।
भमती भ्रमावर्ता ।
सूणहर शयनगृहम् ।
चाचर चत्वरम् ।
चउरी चतुरिका ।
चउसालउ चतुःशालम् ।
दारीवाडउ दारिकावाटकः ।
ऊवट उद्वर्त्म ।
रान अरण्यम् ।
वाफ वाष्पः ।
आधरण आधाणं, अधिश्रयणं वा ।
सेवंती शतपत्रिका ।
कणयर करवीरः ।
केउल किंचकिलः ।
पाउल पाटला ।
पुंआड प्रपुनाटः ।
जव यवः ।
कोठीभडउ कोष्ठभेदकः ।
मांडा मण्डका ।
साकुली शष्कुली ।
वालहली वल्लफलिका ।
खीच क्षिप्रः ।
खीचडी क्षिप्रचटिका ।
खारिक खार्यारिका ।
टोपरउ टोपरः ।
काढउ काथः ।
तंगोटी कौपीनपट्टी ।
साथरउ संस्तारः ।

मांची मञ्चिका ।
नही नखिका ।
वइंगणु वृन्ताकम् ।
हलद हरिद्रा ।
आदउ आर्द्रकम् ।
चउरसउ चतुरस्रः ।
धोयण धावनम् ।
मोकलउ मुकुलः ।
पिहुलउ पृथुलः ।
गाडरि गड्डरी ।
जुआरि युगन्धरी ।
पूअरउ पूतरकः ।
भइरव भैरवी ।
भीखारी भिक्षाचरः ।
दांतिलउ दन्तुरः ।
खोडउ खोडः ।
मातउ मत्तः ।
दोसी दौष्यिकः ।
सांबलउ शम्बलम् ।
प्राहुणउ प्राघुणः ।
लाज लज्जा ।
पजूसण पर्युषणा ।
चउमासउ चतुर्मासकम् ।
अठाही अष्टाह्निका ।
पाखखमण पक्षक्षपणम् ।
पोरसी पौरुषी ।
नवकारसही नमस्कारसहितम् ।
पचखाण प्रत्याख्यानम् ।
पडिकमणउ प्रतिक्रमणम् ।
पडिलेहण प्रतिलेखना ।
वांदणउ वन्दनकम् ।
खामणउ क्षामणकम् ।
काउसग कायोत्सर्गः ।
खमासण क्षमाश्रमणम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वखाण व्याख्यानम् ।
पडंजणी प्रमार्जनिका ।
कम(व)ली कपरिका, कपलिका वा ।
ठवणी स्थापनी ।
पायठवणउ पात्रस्थापनकम् ।
गोछउ गोच्छकम् ।
पायकेसरी पात्रकेशरिका ।
पडलउ पटलकम् ।
रयताणउ रजस्त्राणम् ।
त्रिपणउ तर्पणकम् ।
कडहटउ कटाहटकम् ।
लेखणि लेखनी ।
मसीभाजणउ मषीभाजनम् ।
वेहणउ वेधनकम् ।
दांडी दण्डिका ।
आचार्यांस आचार्यमिश्राः ।
उपाध्यायांस उपाध्यायमिश्राः ।
वणारिस वाचनाचार्यः ।
पंड्यांस पण्डितमिश्रः ।
गणीस गणिमिश्रः ।
ओली आली ।
बोर बदरम् ।
नोमाली नवमालिका ।
फोफल पूगफलानि ।
मयगल मदकलः ।
अलसी अतसी ।
सालवाहन सातवाहनः ।
पलीवणउ प्रदीपनकम् ।
लाठि यष्टिः ।
कणियार कर्णिकारः ।
कानी कर्णिका ।
माटी मृत्तिका ।
विसंठुल विसंस्थुलः ।
उछाह उत्साहः ।
सींभ श्लेष्मा ।
पांभडी पक्ष्माटिका ।
आलाणथंभ आलानस्तम्भः ।
मरहट महाराष्ट्रः ।
ताठउ त्रस्तः ।
सीख शिक्षा ।
जस यशः ।
विमासिवउ विमर्शनम् ।
डरयउ दरितः ।
चकयउ चकितः ।
पीपलीमूल पिप्पलीमूलम् ।
जोतिषी ज्योतिषिकः ।
निमित्ती नैमित्तिकः ।
ऊठिवउ उत्थानम् ।
ताली तालिका ।
तिलउ तिलकः ।
मसउ मषः ।
ऊवटणउ उद्वर्त्तनम् ।
सन्यासी सान्यासिकः ।
बांभण ब्राह्मणः ।
हुंछउ उञ्छः ।
पाथउ प्रस्थः ।
आढउ आढकः ।
हाथ हस्तः ।
एवाल जावालः ।
कुडुंबी कुटुम्बी ।
दात्रउ दात्रम् ।
सूंबरी वडी शुंबस्य वटी ।
सुंचल सौवर्चलम् ।
कुरुखेत कुरुक्षेत्रम् ।
कामरू कामरूपः ।
काछउ कच्छः ।
मालवउ मालवः ।
बंग बङ्गाः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अंग अङ्गः ।
मारू मारवः ।
कसमीर कश्मीराः ।
कणउज कन्यकुब्जम् ।
कोसंबी कौशाम्बी ।
चांप चम्पा ।
कूडी कुटः ।
करवती करकपत्रिका ।
घांट घण्टा ।
थूथउ तुच्छम् ।
हीरउ हीरकः ।
वेलू वालुका ।
फुलिंग स्फुलिङ्गः ।
ताड तालः ।
पीलू पीलु ।
गूगल गुग्गुलुः ।
गलियार गलिः ।
बिलाडउ बिडालः ।
मंजार मार्जारः ।
पाढ पाठः ।
टसर तसरः ।
साइणि शाकिनी ।
भुइफोड भूमिस्फोटः ।
ओंधाहूली अधःपुष्पी ।
संखाहोली शङ्खपुष्पी ।
सोवा शतपुष्पी ।
सु तद् सः ।
जो यद् यः ।

'तनित्यजियजिभ्यो डद्' इति डद् ।

अउ इदम्, अयम् ।

'इणो दमक्' इति दमक् ।

एह एतद् एषः 'इणस्तद्' इति तद् ।
कुण किम्, कः ।

'को डिम' इति डिम् ।

तुं, तुम्हे युष्मद्—त्वम्, यूयम् ।

युषः सौत्रः सेवायाम् ।

हुं, अम्हे अस्मद्—अहं, वयम् ।

'असूच् क्षेपणे' 'युष्यसिभ्यां क्यद्' इति क्यद् ।

आणंद आनन्दः ।

अथ क्रियाविधिविभागः । त्रिविधो धातुः परस्मैपदी, आत्मनेपदी, उभयपदी चेति । तत्र परस्मैपदिधातोः कर्त्तरि परस्मैपदम्, आत्मनेपदिधातोः कर्त्तरि आत्मनेपदम्, उभयपदिधातोः कर्त्तरि उभयपदम् । कर्मणि भावे च त्रिभ्योऽप्यात्मनेपदमेव । प्रत्येकं विभक्तिप्राप्तिमाह—

'हवइ, दियइ, लियइ, करइ, **इत्यादौ वर्त्तमानायाः परस्मैपदम् ।**

'दीजइ, लीजइ, कीजइ' **इत्यादौ कर्मणि वर्त्तमानाया आत्मनेपदम् ।**

'देजे, लेजे, करिजे' **इत्यादौ एकारान्तवचने सप्तमी ।**

'देइ, लेइ, करि' **इत्यादौ अनुमति पञ्चमी । क्रियासमभिहारे सर्वकालेषु पञ्चम्या मध्यमपुरुषैकवचनम् । क्रियासमभिहारः पौनःपुन्यं भृशार्थो वा । यथा** माघकाव्ये—यो रावणः ।

'पुरीमवस्कन्द लुनीहि नन्दनं, मुषाण रत्नानि हरामराङ्गनाः ।'
अत्रातीते काले हि ।

'दीजउ, लीजउ, कीजउ' **इत्यादौ कर्म्मणि पञ्चम्या आत्मनेपदम् ।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'दीधउ, लीधउ, कीधउ' **इत्यादौ ह्यस्तन्यद्यतन्यौ परोक्षा च ।**

'काल्हि दीधउ' **इत्यादौ ह्यस्तन्येव, न परोक्षाद्यतन्यौ ।**

'आज दीधउ, आज लीधउ' **इत्यादौ अद्यतनी, न परोक्षाह्यस्तन्यौ ।**

'म देइ, म लेइ, म करि, म देसि, म लेसि, म करिसि' **इत्यादौ माशब्दयोगेऽद्यतनी, मास्म योगे ह्यस्तन्यद्यतन्यौ, माङ्योगे तु यथाप्राप्ते पञ्चमी भविष्यन्ती च ।**

'म दीधु, म लीधु, म कीधु' **इत्यादौ कर्मणि माशब्दयोगे अद्यतन्याः, मास्मयोगे ह्यस्तन्यद्यतन्योः, माङ्योगे तु पञ्चम्या आत्मनेपदम् ।**

'जइ देत, जइ लेत, जइ करत' **इत्यादौ क्रियातिपत्तिः ।**

'जइ दीजत, जइ लीजत, जइ कीजत' **इत्यादौ कर्म्मणि क्रियातिपत्तेरात्मनेपदम् ।**

'देसिइ, लेसिइ, करिसिइ' **इत्यादौ,** 'नही दियइ, नही लियइ, नही करइ' **इत्यादौ च भविष्यन्ती ।**

'दीजिसिइ, लीजिसिइ, कीजिसिइ' **इत्यादौ,** 'नही दीजइ, नही लीजइ, नही कीजइ' **इत्यादौ च कर्मणि भविष्यन्त्या आत्मनेपदम् ।**

'काल्हि देसिइ, काल्हि लेसिइ' **इत्यादौ श्वस्तनी ।**

'वर्षशत जीविसिइ, वइरी जिणिसिइ' **इत्यादौ आशीर्युक्ते भविष्यति काले आशीः ।**

अथ कृत्प्रत्ययप्राप्तिमाह–

'देतउ, लेतउ, करतउ' **इत्यादौ कर्त्तरि वर्तमाने शतृशानौ परस्मैपद्यात्मनेपदिनोः । उभयपदिन उभावपि ।**

'दीजतउ, लीजतउ, कीजतउ' **इत्यादौ कर्मणि शानः ।**

देणहार, **दायकः दाता;** लेणहार, **लायकः लाता;** करणहार, **कारकः कर्ता इत्यादौ वर्त्तमाने अकर्तृवौ ।**

'दीधउ' **दत्तः दत्तवान्;** लीधउ, **लातः लातवान्;** कीधउ, **कृतः कृतवान् इत्यादौ अतीते क्त-क्तवंतू; कर्मणि क्तः, कर्त्तरि क्तवन्तुः । गत्यर्थाकर्मकादिभ्यः कर्त्तरि क्तोऽपि । यथा–अयमागतः आगतवानपि । तथा परस्मैपदिनः क्वसुः, आत्मनेपदिनः कानः, उभयपदिन उभावपि ।**

'देइउ, लेइउ, करीउ' **इत्यादौ क्त्वा,** 'देवा, लेवा, करिवा' **इत्यादौ दातुमित्यादि शक्लृज्ञायोगे क्त्वा प्रत्ययोक्तौ तुम् ।** 'करी जाणुं, पढी सकउं' **कर्तुं जानामि पठितुं शक्नोमि, इति ।**

'देवउं, लेवउं, करिवउं' **इत्यादौ कर्मणि तव्यानीयौ – दातव्यं दानीयम्, कर्त्तव्यं करणीयम् । क्वचित् क्यप् ण्यणावपि – कृत्यं, कार्यं चेति ।**

'देणाहरु, लेणाहरु, करणाहरु' **इत्यादौ भविष्यति काले तुमन्तात् काममनसौ, तुमो मलोपश्च । दातुकामः दातुमनाः, कर्तुकामः कर्तुमनाः ।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ क्रियापदानि–

हवइ भवति ।
कलइ कलयति ।
गिणइ गणयति ।
गुणइ गुणयति ।
चीत्रइ चित्रयति ।
दूषइ दूषयति ।
मूत्रइ मूत्रयति ।
रचइ रचयति ।
विरचइ विरचयति ।
वर्णवइ वर्णयति ।
कहइ कथयति ।
परूवइ प्ररूपयति ।
वांटइ वण्टयति ।
हींडोलइ हिंदोलयति ।
धमइ धमति ।
पियइ पिबति ।
जायइ याति ।
लियइ लाति ।
वायइ वाति ।
न्हायइ स्नाति ।
चिणइ चिनोति ।
ऊडइ उड्डयते ।
धूणइ धूनयति ।
करइ करोति, कुरुते वा ।
जागइ जागर्त्ति ।
आदरइ आद्रियते ।
धरइ धरति ।
भरइ भरति ।
मरइ म्रियते ।
वरइ वृणुते ।
हरइ हरति ।
गिरइ गिरति ।
तरइ तरति ।
गायइ गायति ।
ध्यायइ ध्यायति ।
ध्रायइ ध्रायति ।
संकइ शङ्कते ।
हीकइ हिक्कति ।
लिखइ लिखति ।
मागइ मार्गयति ।
अरथइ अर्थति ।
लांघइ लङ्घते ।
अरचइ अर्चयति ।
संकुचइ संकुचति ।
चरचइ चर्चयति ।
पचइ पचति ।
लुंचइ लुञ्चति ।
वाचइ वाचयति ।
वंचइ वञ्चयते ।
सोचइ शोचति ।
सींचइ सिञ्चति ।
पूछइ पृच्छति ।
वांछइ वाञ्छति ।
उपारजइ उपार्जति ।
गाजइ गर्जति ।
आंजइ अनक्ति ।
गुंजइ गुञ्जति ।
कूजइ कूजति ।
तर्जइ तर्जति ।
तिजइ त्यजति ।
पींजइ पिञ्जयति ।
भांडइ भण्डयति ।
भांजइ भनक्ति ।
भाजइ भज्यते ।
मांजइ मार्ष्टि, मार्जति वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लाजइ लज्जते ।
सरजइ सृजति ।
कूटइ कुट्टयति ।
खेडइ खेटयति ।
घटइ घटयति ।
चूंटइ चुण्टयति ।
तोडइ त्रोटयति ।
त्रूटइ त्रुटति ।
मोडइ मोटयति ।
लूटइ लुण्टयति ।
फोडइ स्फोटयति ।
फूटइ स्फुटति ।
लुठइ लुठति ।
ओलंडइ ओलण्डयति ।
क्रीडइ क्रीडति ।
खंडइ खण्डयति ।
जोडइ जोडयति ।
बूडइ ब्रडति ।
मांडइ मण्डयति ।
पीडइ पीडति ।
कीर्त्तइ कीर्त्तयति ।
चींतवइ चिन्तयति ।
नाचइ नृत्यति ।
पडइ पतति ।
आपडइ आपतति ।
ऊपडइ उत्पतति ।
कुहइ कुथ्यति ।
मथइ मथ्नाति ।
आक्रंदइ आक्रन्दयति ।
कूदइ कूर्दते ।
खायइ खादति ।
निंदइ निन्दति ।
पादइ पर्दते ।
मर्दइ मृद्नाति ।
रोयइ रोदिति ।
वांदइ वन्दते ।
वेयइ वेत्ति ।
हगइ हदते ।
ऊपजइ उत्पद्यते ।
नीपजइ निष्पद्यते ।
संपजइ संपद्यते ।
बांधइ बध्नाति ।
बूझइ बुध्यते ।
झूझइ युध्यते ।
रूंधइ रुणद्धि ।
रांधइ राध्यति ।
आराधइ आराध्यति ।
सूझइ शुध्यति ।
सीझइ सिध्यति ।
साधइ साध्नोति ।
वींधइ विध्यति ।
खणइ खनति ।
जामइ जायते ।
मानइ मानति ।
हणइ हन्ति ।
आपइ अर्प्पयति ।
कुपइ कुप्यति ।
कांपइ कम्पते ।
कलपइ कल्पते ।
जपइ जपति ।
तपइ तपति ।
दीपइ दीप्यते ।
धूपइ धूपयति ।
लींपइ लिम्पयति ।
लोपइ लुम्पति ।
चुंबइ चुम्बति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विलंबइ विलम्बते ।
खुभइ क्षोभते ।
खोभइ क्षोभयति ।
लहइ लभते ।
सोभइ शोभते ।
खमइ क्षमते ।
जीमइ जेमति ।
नमइ नमति ।
दमइ दाम्यति ।
भमइ भ्रमति ।
रमइ रमते ।
वमइ वमति ।
कामइ कामयते ।
आक्रमइ आक्रमते ।
खिरइ क्षरति ।
विचारइ विचारयति ।
चोरइ चोरयति ।
पूरइ पूरयति ।
मंत्रइ मन्त्रयते ।
निजंत्रइ नियन्त्रयति ।
फुरइ स्फुरति ।
गालइ गालयते ।
गिलइ गिलति ।
टलइ टलति ।
फलइ फलति ।
आफलइ आस्फलति ।
हालइ हलति ।
हीलइ हीलयति ।
चावइ चर्वयति ।
जीवइ जीवति ।
धावइ पही धावति पथिकः ।
बालक मा नइ धावइ
बालको मातरं धावति ।

सीवइ सीव्यति ।
सेवइ सेवते ।
नासइ नश्यति ।
विणसइ विनश्यति ।
डसइ दशति ।
पइसइ प्रविशति ।
फरसइ स्पृशति ।
काढइ कर्षति ।
खसइ खषति ।
घसइ घर्षति ।
घोसइ घोषति ।
चूसइ चूषति ।
पोसइ पुष्यति ।
भखइ भक्षति ।
भीखइ भिक्षते ।
भाषइ भाषते ।
भषइ भषति ।
मुसइ मुष्णाति ।
रूसइ रुष्यति ।
राखइ रक्षति ।
हीसइ हेषति ।
लखइ लक्षयति ।
वरसइ वर्षति ।
सुसइ शुष्यति ।
सीखइ शिक्षते ।
हरषइ हृष्यति ।
तूसइ तुष्यति ।
खासइ कासते ।
त्रासइ त्रस्यति ।
निरभरछइ निर्भर्त्सयति ।
नीससइ निःश्वसिति ।
ऊससइ उच्छ्वसिति ।
प्रसंसइ प्रशंसति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रहइ गृह्णाति ।
गरहइ गर्हति ।
दोहइ दोग्धि ।
दहइ दहति ।
मूझइ मुह्यति ।
वहइ वहति ।
नीसरइ निस्सरति ।
ओसरइ अपसरति ।
फाडइ पाटयति ।
ठंभीजइ स्तभ्यते ।
वजरइ कथयति ।
दुगुंछइ जुगुप्सते ।
सद्दहइ श्रद्धत्ते ।
उंघइ निद्राति ।
मिलायइ म्लायति ।
ढांकइ छादयति ।
दूमइ दावयति ।
धवलइ धवलयति ।
तोलइ तुलयति ।
मेलवइ मिश्रयति ।
भमाडइ भ्रमयति ।
नसावइ नाशयति ।
दाखवइ दर्शयति ।
ओंगालइ रोमन्थयति ।
प्रकासइ प्रकाशयति ।
कंपावइ कम्पयति ।
लुकइ निलीयते ।
नीवडइ पृथक् स्पष्टो वा भवतीत्यर्थः ।
आछोटइ आछोटयति ।
वीसरइ विस्मरति ।
महमहइ मालती मालतीगन्धः प्रसरति ।
साहरइ, संवरइ संवृणोति ।
समारइ समारचयति ।
छाजइ, रिजइ राजते ।
खूपइ मज्जति ।
पूंजइ पुञ्जयति ।
विढवइ अर्जयति ।
जूपइ युनक्ति ।
उखुडइ उलूरइ त्रुटति ।
घोलइ घूर्णति ।
विरोलइ मथ्नाति ।
ऊदलइ आर्चिलदइ ओछिनत्ति ।
फंदइ स्पन्दते ।
मलइ मृद्नाति ।
झूरइ / विसूरइ } खिद्यते ।
हाकइ निषेधते ।
झखइ संतपति ।
समाणइ समापयति ।
घातइ क्षिपति ।
लोटइ स्खलिति ।
बडबडइ विलपति ।
आढवइ आरभते ।
जंभाआइ जृम्भते ।
आभिडइ संगच्छते ।
फीटइ / भुल्लइ } भ्रंशते ।
देखइ पश्यति ।
छिवइ स्पृशति ।
ढंढोलइ गवेषयति ।
चोपडइ भक्षयति ।
डरइ त्रस्यति ।
पलोटइ पर्यस्यति ।
चडइ आरोहति ।
थाकइ श्रकति, नीचां गतिं करोति, विलम्बयति वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विट्टालइ अस्पृश्यसंसर्गं करोति ।
चांपइ आक्रमति ।
पमावइ प्रमापयति ।
हाथी गुलगुलायइ हस्ती गुलगुलायते ।
ऊललियइ उल्लालयति ।
ढोकइ ढौकयति ।
पधारउ पादाऽवधार्यताम् ।
संभालइ संभालयति ।
पलाणइ पर्याणयति ।
लालइ लालयति ।
सांधइ संधयति, संधत्ते वा ।
हेरइ हेरयति ।
धीरवइ धीरयति ।
भलिसुं भलिष्ये ।
ऊछलइ उच्छलति ।
ऊछालइ उच्छालयति ।
साहइ साहयति ।
संवाहइ संवाहयति ।
कूकइ कूत्करोति कुर्वते वा ।
ढूकइ ढौकते ।
थांभइ स्तभ्नाति ।
ताकइ तर्कति ।
निर्धाटइ निर्धाटयति ।
ऊलडइ उल्लुठयति ।
विकुर्वइ विकुर्वति ।
पालइ पालयति ।
पायइ पाययति ।
बोलइ ब्रवीति ।
जीपइ जयति ।
जाणइ जानाति ।
आरंभइ आरभते ।
सांभरइ स्मरति ।
परीछइ परेरिधे:, परीच्छति ।
ग्रसइ ग्रसते ।
अभ्यसइ अभ्यस्यति ।
विमासइ विमृशति ।
पडीगइ प्रतिकरोति ।
छइ अस्ति ।
आखइ आख्याति ।
आवइ एति, आयाति वा ।
ऊगइ उदेति ।
आथमइ अस्तमेति ।
पूजइ पूजयति ।
नमस्करइ नमस्करोति ।
कुसणइ कुष्णाति ।
वीनवइ विज्ञपयति ।
वापरइ व्याप्रियते ।
पावइ प्रापति (प्राप्नोति ?)
पामइ प्रपूर्वोऽमिः प्राप्तौ, प्रामति ।
वीखरइ विकिरति ।
परिणइ परिणयति ।
वीवाहइ वीवाहयति ।
पूरइ पूर्यते ।
वीहइ विभेति ।
वीहावइ भाषयते ।
उल्लावइ उल्लवति ।
उल्लींचइ उल्लुञ्चति ।
सूंघइ शिंघति ।
छांडइ छर्दयति ।
निरखइ निरीक्षते ।
परखइ परीक्षते ।
ऊवेखइ उपेक्षते ।
उभ्रकइ उद्रेकते ।
पडखइ प्रतीक्षते ।
समरइ स्मरति ।
वलइ ज्वलति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वालइ ज्वालयति ।
मोलइ मृदु लुनाति ।
विंढइ विध्यति ।
माचइ माद्यति ।
दूमइ दुनोति ।
सुणइ शृणोति ।
दीखइ दीक्षते ।
सुहायइ सुखायति ।
विगोवइ विलोपयति, विगूयति ।
विगूयइ विगूप्यति ।
नरनरइ नदति ।
थवइ स्थगयति ।
करडइ / **काटइ** कृन्तति ।
नांखइ निःक्षिपति ।
पखालइ प्रक्षालयति ।
धोअइ धावति ।
संधूखइ संधुक्षते ।
सांचइ संचिनोति ।
अउगनाइ अपकर्णयति ।
ऊजालइ उज्ज्वलयति ।
गांठइ ग्रन्थते (ग्रथ्नाति ?) ।
चूअइ चोतति ।
थीजइ स्त्यायते ।
वीझायइ विध्यायति ।
वीझावइ विध्यापयति ।
वाधइ वर्द्धते ।
खीलइ कीलति ।
ऊमटइ उन्मज्जति ।
पसवइ प्रसवति ।
मायइ माति ।
भणइ भणति ।
पढइ पठति ।
सूअइ स्वपिति ।
फेडइ स्फेटयति ।
पसीअइ प्रसीदति ।
ओढइ अवगुण्ठते ।
प्रोअइ प्रवयति ।
वणइ वयते ।
प्रेरइ प्रेरयति ।
वलइ वलते ।
आलिंगइ आलिंगति ।
वाअइ वादयति ।
छायइ छादयति ।
लाडइ लडति ।
मनावइ मानयति ।
द्रवडइ द्रुताटयति ।
कुसइ क्रोशति ।
निउंजइ नियोजयति, नियन्त्रयति वा ।
कसइ कषति ।
लुणइ लुनाति ।
कींगायइ केकायते ।
खोडायइ खोडायते ।
विहडइ विघटते ।
मीचइ मीलति ।
ऊजाइ उद्याति ।
अवहथइ अपहस्तयति ।
मानइ मन्यते ।
वासइ वासयति ।
आलूजइ अलमुज्जति ।
पहिरइ परिदधाति ।
छेदइ छेदयति ।
पसीजइ प्रस्विद्यते ।
तीमइ तेमयति ।
अडवडइ अधःपतति, अधःपूर्वः पतः ।
सिणमिणइ शनैर्मिनोत्यम्बुदः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बसवसइ वहु स्यन्दति भूमिः ।
उंजइ उदञ्जयति ।
ऊघडइ उद्घटते ।
फीटइ स्फिटते ।
सूकइ शुष्कति ।
खूंदइ क्षुन्ते, क्षुणत्ति वा ।
सीदाअइ सीदति ।
ऊगटइ उद्वर्त्तयति ।
भेदइ भिनत्ति ।
सरवइ श्रवति ।
खीजइ खिद्यते ।
विआरइ विप्रतारयति ।
विंहचइ विभजति ।
खडहडइ खटत्पतति ।
गलअलइ गलद्विलति ।
पतीजइ प्रत्ययते, प्रत्येति, प्रतीयते वा ।
पवीत्रइ पवित्रयति ।
पालटइ परावर्त्तयति, परिवर्त्तयति वा ।
हडहडइ हटाद्धसति, हडहडयति वा ।
परीसइ परिवेषयति ।
वींटइ वेष्टते ।
ऊवेढइ उद्वेष्टते ।
समेटइ समेटयति ।
वीसमइ विश्राम्यति ।
चडइ चटति ।
अउलवइ अपलपति ।
आचमइ आचामति ।
ऊपणइ उत्पवते ।
वीकइ विक्रीणाति ।
ऊघडइ उद्घटते ।
ऊघाडइ उद्घाटयति ।
ऊठइ उत्तिष्ठति ।
नीठइ निस्तिष्ठति ।
अडइ अड्डति ।
वावइ वपति ।
छिवइ छुपते, स्पृशति वा ।
छूटइ छुट्टति ।
उखेलइ उत्कीलयति ।
खीलइ कीलति ।
वघारइ व्याघारयति ।
वखाणइ व्याख्यानयति ।
सकइ शक्नोति ।
दंभइ दम्भोति ।
परवारइ प्रपारयति ।
वारइ वारयति ।
निवारइ निवारयति ।
वरांसीयइ विपर्यस्यति ।
पल्हालइ पर्याद्रवयति ।
पालवइ पल्लवयति ।
पचारइ प्रत्युचारयति ।
थाहरइ स्थानमाहरति ।
आयसइ आदिशति ।
टलवलइ टलद्वलति ।
कलकलइ कलकलयति ।
झणझणइ झणझणयति ।
वाधइ वर्द्धयति ।
हसइ हसति ।
सहइ सहते ।
आखुडइ आस्खलति ।
रंजइ रञ्जयति ।
सपइ शपति ।
फडफडइ पटपटायते ।
कडकडइ कटकटायते, चक्षुः ।
उदेगइ उद्वेगयति ।
हींडइ हिंडते ।
ऊकदइ उत्कूदते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रमद्रमइ द्रमद्रमति ।
तडफडइ तटत्पटति, तडफडयति वा ।
त्रडत्रडइ तटत्रुटति ।
लोटइ लुट्यति, लोट्यति, लोटति वा ।
लेटइ लेट्यति ।
नाथइ नाथति, वृषं तु नस्तयति ।
धूंसइ ध्वंसते ।
पाठवइ प्रस्थापयति ।
ससइ श्वसिति ।
वीससइ विश्वसिति ।
गूंथइ ग्रन्थयति ।
मारइ मारयति ।
झंपावइ झम्पामाप्नोति ।
पीसइ पिनष्टि ।
गाहइ गाहते ।
विहाइ विभाति ।
आभिडइ आभ्यटति ।
बइसइ / **उइसइ** } उपविशति ।
ओलखइ उपलक्षयति ।
मोकलावइ मुत्कलापयति ।
गंधाअइ गन्धायते ।
पडूछइ प्रतिपृच्छति ।
ओंठंभइ अवष्टभ्नाति, अवष्टम्भते ।
पलाणइ पर्याणयति ।
सूजइ श्वयति ।
सूजवइ शोफयति ।
वाटइ वर्त्तयति ।
परतइ परिवर्त्तयति ।
खडखडइ खटत्करोति खडखडयति वा ।
उपगरइ उपकरोति ।
निराकरइ निराकरोति ।
रहइ रहति ।
छेकइ छेत्करोति ।
छींकइ छीत्करोति ।
धडहडइ धटत्करोति ।
भडहडइ भटत्करोति, भडहडयति वा ।
हाकइ हात्करोति ।
फूंकइ फूत्करोति ।
चीचूअइ चीत्करोति ।
झाकइ झात्करोति ।
थूकइ थूत्करोति ।
चूकइ चूत्करोति ।
पुकारइ पूत्करोति ।
मागइ मार्गयति ।
याचइ याचते ।
घूमइ घूर्णयति ।
सरइ सरति ।
वधावइ वर्द्धयति ।

अथ कर्मकर्त्तरि –

राचइ रच्यते ।
पाचइ पच्यते ।
दाझइ दह्यते ।
वाजइ वाद्यते ।
खाजइ खाद्यते ।
लुणाइ लूयते ।
घसाइ घृष्यते ।
कराअइ क्रियते ।
जणाइ ज्ञायते ।
वधाअइ वर्ध्यते ।

॥ इति कतिचित् क्रियापदानि ॥

*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ प्रशस्तिः ।

*

राजन्वतीं श्रीजिनराजिसन्ततिं कुर्वत्सु शश्वज्जिनचन्द्रसूरिषु ।
सूरीकृतश्रीजिनसिंहसूरिषु युगप्रधानेषु महोगभस्तिषु ॥ १ ॥

खरतरगणपाथोराशिवृद्धौ मृगाङ्का,
यवनपतिसभायां ख्यापितार्हन्मताज्ञाः ।
प्रहतकुमतिदर्प्पाः पाठकाः साधुकीर्त्ति-
प्रवरसदभिधाना वादिसिंहा जयन्तु ॥ २ ॥

तेषां शास्त्रसहस्रसारविदुषां शिष्येण शिक्षाभृता
भक्तिस्थेन हि **साधुसुन्दर** इति प्रख्यातनाम्ना मया ।
ग्रन्थोऽयं विहितः कवीश्वरवचोबुद्ध्योक्तिरत्नाकरः
स्वान्यानां हितहेतवे बुधजनैर्मान्यश्चिरं नन्दतु ॥ ३ ॥

॥ इति पं० साधुसुन्दरगणिविरचित उक्तिरत्नाकरग्रन्थः सम्पूर्णः ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अज्ञातविदृत्कर्तृक उक्तीयक

॥ ई ॥ श्रीशारदायै नमः ॥

*

आरोपइ आरोपयति ।
आरोहइ आरोहति ।
उन्मूलइ उन्मूलयति ।
ऊठइ उत्तिष्ठति ।
ऊठाडइ उत्थापयति ।
थापइ स्थापयति ।
स्पर्द्धइ स्पर्द्धते ।
ऊलालइ उल्लालयति ।
ऊललइ उल्लसति ।
ऊछालइ उच्छलति ।
ऊडइ उड्डीयते ।
आथमइ अस्तमेति, अस्तमयति, अस्तं गच्छति, अस्तं याति ।
प्रकासइ प्रकाशयति ।
सूझइ शुध्यति ।
सूझवइ शोधयति ।
दूहवइ दुनोति, दुःखीकरोति ।
आश्रइ आश्रयति, आश्रयते ।
षा(खा)सइ कासते ।
ष(ख)मइ क्षमते, सहते, क्षाम्यति ।
निंदइ निन्दति, जुगुप्सते ।
पडीगरइ चिकित्सति ।
थूं(खूं)दइ क्षुण्णाति ।
पीसइ पिनष्टि ।
परिसीजइ परिश्रियति ।
दो[गुं]छइ निर्भर्त्सयति ।
त्रासवइ त्रासयति ।
त्रासइ त्रस्यति ।
कांपइ कंपते ।
फिरइ भ्रमति, परिभ्रमति ।
विहसइ विकसति ।
भेलइ मिश्रयति ।
रमइ रमते, क्रीडति ।
चुंकलइ तुदति ।
प्रेरइ प्रेरयति, नुदति ।
भुंजइ भुञ्जाति ।
वांछइ वाञ्छति, इच्छति, अभिलषते ।
नमस्करइ नमस्करोति, नमस्यति, प्रणमति ।
वांदइ वन्दते ।
पूजइ पूजयति, अर्चयति, महति ।
छांडइ त्यजति, जहाति, उज्झति ।
वीहइ बिभेति ।
नीकोलइ निःकृणाति ।
वीससइ विश्वसिति ।
ससइ श्वसति (श्वसिति ?) ।
नीससइ निःश्वस(सि)ति ।
वारइ वारयति ।
निवारइ निवारयति ।
निषेधइ निषेधयति ।
आलोचइ आलोचयति, पर्यालोचयति ।
जायइ गच्छति, याति ।
आवइ आगच्छति ।
